# मनोवृत्तयः तद्वाचकाश्च शब्दाः ।

वि आर् मनोजः

वैय्याकरणाः प्रक्रियालाघवसम्पादनाय शब्दान् प्रयोगेणानुसन्धाय वर्गीकृत्य परिशीलयन्ति। तत्तद्विषयसम्बद्धानां शब्दानां क्रोडीकरणेन शास्त्रान्तराध्ययनाय अपेक्षिता व्युत्पत्तिः सम्पत्स्यते। व्याकरणशास्त्रेऽपीयं प्रणाली अनुस्रियते। यथा धातवः विकरणादिविशेषमनुसृत्य क्रोडीकृताः येन स्वरूपावगमने लाघवं सिद्ध्यति। एवं शब्दाः विशिष्टार्थप्रतिपादकाः साम्यमादाय कोशकारैः क्रोडीकृताः। तद्वदिहापि वैशद्यसम्पादनाय मनोवृत्तिवाचकाः शब्दाः अकाराद्यनुक्रमेण क्रोडीक्रियन्ते। मनो धीरहंकृतिश्चित्तमित्येतेषु अन्तःकरणेषु सचल्पविकल्पात्मकमिन्द्रियं मनः। तस्य वृत्तिः प्रवृत्तिः। येन लक्षणेनायं लक्ष्यते तस्य सैव वृत्तिः।

1. **आदरानादरौ** - गौरवहेतुकं सम्माननमादरः। तद्विरोधोऽनादरः। परिभवे तिरस्कारे अवज्ञायाञ्च तेषामादरविरोधित्वात्तथात्वम्। अनादरः परिभवः परिभावस्तिरस्क्रिया। रीढावमाननावज्ञावहेलनमसूर्क्षणमित्यमरः। आङ्पूर्वाद् दृङ् आदरे इत्यस्माद् भावे अप्। अनादरे तु नञ्।

   सम्भावयति सूर्क्षति सम्मन्यते आद्रियते सत्करोति सत्कुरुते पुस्तयति बुस्तयति इत्यष्टौ आदरवाचकास्तिङः।

   आद्यौ भौव्वादिकौ। सम्पूर्वः भू सत्तायाम् इत्यस्माण्ण्यन्तात् तथा सूर्क्ष आदरे इत्यस्माच्च निष्पन्नौ। ततः सम्पूर्वः मन ज्ञाने इति दिवादिः। आद्रियते इत्यस्मिन् आङ्पूर्वः दृङ् आदरे इति तौदादिको धातुः। 'रिङ् शयग्लिङ्क्षु' (पा.सू.७.४.२८) इति रिङादेशः। निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाः सुधामपीति श्रीहर्षः (नैष.१.१)। सत्करोति - सत्कुरुते इत्यनयोः सत् + डुकृञ् करणे इति तनादिः। अन्त्यौ पुस्त बुस्त आदरानादरयोरिति चुरादी।

   अवधीरयति परिभवति मङ्क्ते हिण्डते हेडते होडते शेटति सेटति रौडति अतिसन्दधाति अतिसन्धत्ते अवमन्यते अधःकरोति अधःकुरुते तिरस्करोति तिरस्कुरुते विप्रकरोति विप्रकुरुते निकरोति निकुरुते अवजानाति अट्टयति सुट्टयति स्माययते यातयति विमानयति अवगणयति इति सप्तविंशतिरनादरवाचकाः।

   अवधीरयतीत्यत्र अवपूर्वो धीर धातुः। 'बहुलमेतन्निदर्शनम्' (गणसूत्रम्) इत्यत्र बहुलग्रहणस्य अदन्तधातुनिदर्शनमित्यर्थ माख्याय धीरधातुराहरणीयः। अथवा दशगणीपाठो बहुलमित्यर्थान्तरमुपकल्प्यात्र समाधेयम्। परिभवति इत्यत्र परिपूर्वः भू सत्तायाम्। मङ्क्ते इत्यत्र मघि गत्याक्षेपे कैतवे चेति भौव्वादिकाः। इदित्वात् 'इदितो नुम्धातोः' (पा.सू.७.१.५८) इति नुमागमः। हिण्डते इत्यारभ्य रौडतीति यावत् यथाक्रमं हिडि गत्यनादरयोः, हेड़ृ अनादरे, होड़ृ अनादरे, शिट अनादरे, षिट अनादरे, रौड़ृ अनादरे इत्येते धातवः। अतिसन्दधाति - अतिसन्धत्ते इत्यनयोः अतिपूर्वः डुधाञ् धारणपोषणयोरिति जौहोत्यादिः। अवमन्यते इत्यत्र अवपूर्वः मन ज्ञाने। अधःकरोति - अधःकुरुते, तिरस्करोति - तिरस्कुरुते इत्यादौ अधस्तिरोभ्यां डुकृञ् करणे। 'तिरसोऽन्यतरस्याम्' (पा.सू.८.३.४२) इति विकल्पविधानात्पक्षे तिरःकरोति - तिरःकुरुते। विप्रकरोति - विप्रकुरुते, निकरोति - निकुरुते इत्यादौ वि प्र इत्युपसर्गद्वयपूर्वः तथा नि पूर्व कश्च डुकृञ् करणे। अवजानाति इत्यत्र अवपूर्वः ज्ञा अवबोधने इति क्र्यादिः। ततः अट्टयति इत्यारभ्य आन्तं यथाक्रमं अट्ट अनादरे, षुट्ट अनादरे, स्मिट अनादरे - ष्मिङ् इत्येके, यत निकारोपस्कारयोः, विपूर्वः मान पूजायाम्, अवपूर्वः गण सॅख्याने इत्येते चौरादिकाः।

2. **अनुशयः** - अनु शीङ् स्वप्ने। पचाद्यच्। अनुगतः शयं हस्तं इति गतिसमासः। अत्यन्तद्वेषे पश्चात्तापे पूर्ववैरे चानुशयशब्दः प्रयुज्यते। क्रीतस्य विक्रीतस्य अन्यथा वा कृतस्य वस्तुनः असमीचीनत्वबुद्ध्या यः पश्चात्तापः सोऽप्यनुशयः। भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः इति विश्वः।

अनुशेते अनुतपति विप्रतिसरति इति त्रयस्तिङन्ता अनुशयवाचिनः।

अनुपूर्वो शीङ् स्वप्ने, तप सन्तापे तथा वि प्रति इत्युपसर्गद्वयपूर्वः सृ गतौ इत्येते भौव्वादिकास्त्रयो धातवः।

3. **आग्रहः** - आ ग्रह उपादाने। भावे अप्। आवेशे आसक्तौ अभिनिवेशे आक्रमे अनुग्रहे ग्रहणे चाग्रहशब्दः प्रयुज्यते।

अभिनिविशते इत्याग्रहवाची तिङन्तः। अभि नि इत्युपसर्गद्वयपूर्वः विश प्रवेशने इत्यस्माद् 'नेर्विशः' (पा.सू.१.३.१७) इत्यात्मनेपदम्।

4. **इच्छा** - एषणम् इच्छा। 'इषु इच्छायाम्' (तुदा.१३५२) इत्यस्य स्त्रियाम् 'इच्छा' इत्येतच्छप्रत्ययान्तं 'इच्छा' (३.३.१०१) इति सूत्रेण निपातितम्। सुखादिज्ञानेन तत्साधनत्वज्ञानेन च जायमाने इदं मे भूयादित्येवं रूपे आत्मधर्मे अभिलाषे च इच्छाशब्दः प्रयुज्यते।

दोहदम् इच्छा काङ्क्षा स्पृहा ईहा तृड् वाञ्छा लिप्सा मनोरथः कामः अभिलाषः तर्षः इत्येते इच्छापर्यायाः।

गाधते नाथते वाञ्छति खटति कामयते हर्यति आशंसते आकाङ्क्षति वाङ्क्षति माङ्क्षति लषति लषते लष्यति लष्यते लिप्सते आशास्ते वष्टि अनुरुध्यते ईप्सति इच्छति स्पृहयति इत्येते एकविंशतितिङन्ताः इच्छतीत्यर्थे प्रयुज्यन्ते।

एतेष्वाद्याः पञ्चदश भ्वादिगणवर्तिभ्यो धातुभ्यो निष्पन्नाः। ततः आदादिकौ द्वौ। तदनु दिवादिरेकः। ततः स्वादिः। तौदादिकः। चौरादिक इति क्रमः। तत्र गाधते इत्येतद् गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च इत्यस्माद्धातोः निष्पद्यते। नाथते इत्येतद् नाथृ याच्ञोपतापैश्वर्याशीःषु इत्यस्माद्धातोः निष्पद्यते। 'आशिषि नाथः' (पा.सू.१.३.२१-वा.४) इत्याशिष्येवात्मनेपदविधानादन्यथासिद्धं परस्मैपदमत्र योजयितुमुचितम्। वाञ्छतीति वाछि इच्छायाम् इत्यतो निष्पन्नम्। द्राक्षां जनो वाञ्छति नो फलानि ध्राङ्क्षबहुध्वाङ्क्षविचूषितानीति नारायणभट्टः (धातु.१.८५)। खटतीति खट काङ्क्षायाम् इत्यस्मान्निष्पद्यते। कामयते इत्यत्र कमु कान्तौ इति धातुः। कान्तिरिहेच्छा। 'कमेर्णिङ्' (पा.सू.३.१.३०) इति स्वार्थे णिङ्। नृपेण पाणिग्रहणे स्पृहेति नलं मनः कामयते ममेतीति श्रीहर्षः (नैष.३.६९)। हर्यतीत्येतद् हर्य गतिकान्त्योः इत्यस्मान्निष्पन्नम्। कान्तिरिच्छा। आशंसत इत्यत्र आङः शसि इच्छायाम् इति धातुः। आकाङ्क्षतीति आङ्पूर्वस्य काक्षि काङ्क्षायाम् इत्यस्य रूपम्। वाङ्क्षतीति वाक्षि काङ्क्षायाम् इत्यस्मान्निष्पन्नम्। माङ्क्षतीति माक्षि काङ्क्षायाम् इत्यस्मान्निष्पद्यते। लषति लषते लष्यति लष्यते इत्येतेषु लष कान्तौ इति धातुः। 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (पा.सू.३.१.७०) इति शब्विषये श्यन् विकल्पे रूपचतुष्टयम्। लिप्सते इत्यत्र डुलभष् प्राप्तौ इत्यस्माद् 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (पा.सू.३.१.७) इति सन्। 'अ प्रत्ययात्' (पा.सू.३.३.१०२) इत्यः। आशास्ते इत्येतद् आङुपसर्गपूर्वस्य शासु इच्छायाम् इत्यस्य धातो रूपम्। वष्टीत्यत्र वश कान्तौ इति धातुः। अनुरुध्यत इति अनो रुध कामे इत्यतो निष्पद्यते। ईप्सतीत्यत्र आप्लृ व्याप्तौ इत्यस्माद्धातोः आप्तुमिच्छतीत्यर्थे 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (पा.सू.३.१.७) इति सन्। 'आप्ज्ञप्यृधामीत्' (पा.सू.७.४.५५) इतीत्वम्। इच्छतीत्यत्र इष इच्छायाम् इति धातुः। 'इषुगमियमां छः' (पा.सू.७.३.७७) इत्यन्त्यस्य छादेशः। 'छे च' (पा.सू.६.१.७३) इति तुगागमः। उपास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुमिति कालिदासः (कुमा.१.८)। स्पृहयतीत्यत्र स्पृह ईप्सायाम् इति धातुः।

5. **ईर्ष्या** - अक्षान्तिरीर्ष्येत्यमरः। ईर्ष्य ईर्ष्यार्थः। स्त्रीत्वाट्टाप्। अक्षमायां परवृद्ध्यसहिष्णुतायाम्। पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः' इति मनुः। एते सर्वेऽपि क्रोधप्रभवाः। अत एव 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति सूत्रे द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्तेऽतो विशेषणं सामान्येन यं प्रति कोपः इति सिद्धान्तकौमुद्याम्।

वैरायते स्पर्द्धते सूर्क्ष्यति ईर्क्ष्यति ईर्ष्यति विराध्नोति अभ्यसूयति भर्त्स्यत इत्यष्टावीर्ष्यावाचकाः।

एतेष्वाद्यः क्यङन्तः। ततश्चत्वारो भ्वादयः। ततः स्वादिः। उपान्त्यः कण्ड्वादिः। अन्त्यश्चुरादिः।

वीराणामिदमित्यणन्ताद्वैरशब्दात्करोत्यर्थे 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' (पा.सू.३.१.१७) इति क्यङ्। 'सनाद्यन्ताः धातवः' (३.१.३२) इति क्यङन्तस्य धातुसंज्ञायां लडाषु वैरायते। स्पर्द्धते इत्यत्र स्पर्द्ध सङ्घर्षे इति धातुः। चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्द्धत इति हर्षदेवः (नागा.१.१८)। ततः क्रमशः सूर्क्ष्य ईर्ष्यार्थः, ईर्क्ष्य ईर्ष्यार्थः, ईर्ष्य ईर्ष्यार्थः, विपूर्वः राध संसिद्धौ इत्येते धातवः। अभ्यसूयतीति अभिपूर्वकात् असु उपतापे इत्यस्मात् कण्ड्वादिधातोः 'कण्ड्वादिभ्यो यक्' (पा.सू.३.१.२७) इति यकि 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति यगन्तस्य धातुत्वाल्लडादिषु निष्पद्यते। भर्त्स्यत इत्येतत् भर्त्स तर्जने इत्यस्मात्कर्मणि प्रत्ययः।

6. **उत्साहः** - उत्साहोऽध्यवसायः स्यादित्यमरः। शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः इत्यप्यमरः। तास्वन्यतम उत्साहो नाम उत्तमप्रकृतिः। स चाविषादशक्तिधैर्यशौर्यादिभिर्विभावैरुत्पद्यते। तस्य स्थैर्यत्यागवैशारद्यादयोऽनुभावाः। असंमोहादिभिर्व्यक्तो व्यवसायनयात्मकः। उत्साहस्त्वभिनेयः स्यादप्रमादोत्थितादिभिः।। इति भरतः। उत्पूर्वाद् षह मर्षणे इत्यस्माद्धातोः घञ्। उद्यमे अध्यवसाये कर्तव्यकृत्येषु स्थिरतरे प्रयत्ने चोत्साहशब्दः प्रयुज्यते। उत्साहो मन्त्रमूलं स्यादिति नीतिविदां मतम्। मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन इति शाकुन्तले। मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः इति गीता।

प्रयतते क्रमते क्रम्यते एषते वेहते जेहते वाहते उत्सहते व्यवस्यति आराधयति यस्यति संयसति यसति संयस्यति उद्युङ्क्ते उत्सहति इति षोडशोत्साहवाचकाः ।

आद्यावष्ट भौव्वादिकाः। ततः षट् दिवादयः। ततो रुधादिः चुरादिश्च। प्रयतते इत्येतत् प्रपूर्वस्य यती प्रयत्ने इत्यस्य धातो रूपम्। क्र मते - क्र म्यते इत्येतौ क्र मु पादविक्षेपे इत्यस्मान्निष्पन्नौ 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (पा.सू.३.१.७०) इति शब्विषये श्यन्विकल्पः। 'वृत्तिसर्गतायनेषु क्र मः' (पा.सू.१.३.३८) इत्यात्मनेपदम्। एषते इत्यत्र एषृ गतौ इति धातुः। वेहते इत्येतत् वेहृ प्रयत्ने इत्यस्मान्निष्पन्नम्। जेहते इति जेहृ प्रयत्ने इत्यतो निष्पद्यते। वाहते इत्येतत् बाहृ प्रयत्ने इत्यस्माद्धातोः निष्पद्यते। क्वचिद् ववयोरभेदः। उत्सहते इत्यत्र उत्पूर्वः षह मर्षणे इति धातुः। कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुमिति भारविः (किरा.१.३६)। व्यवस्यतीति वि अव इत्युपसर्गद्वयपूर्वस्य षो अन्तकर्मणि (दिवा.११४८) इत्यस्य रूपम्। पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु येति कालिदासः (शाकु.४.९)। आराधयतीत्यत्र आङ्पूर्वः राधोऽकर्मकाद्वृद्धावेव (दिवा.११८१) इति धातुः। ण्यन्तः। यस्यतीति यसु प्रयत्ने (दिवा.१२११) इत्यस्मान्निष्पद्यते। 'यसोऽनुपसर्गात्' (पा.सू.३.१.७१) इति श्यन्विकल्पनात्पक्षे उत्सर्गे शपि यसति। अनुपसृष्टेऽयं नियमः। तेनोपसृष्टात् प्रयस्यतीति श्यन्नेव भवति। सम्पूर्वात्तु 'संयसश्च' (पा.सू.३.१.७२) इति श्यन्विकल्पे संयस्यति। संयसति इत्येव। संयसतीति यसु प्रयत्ने इत्यस्य रूपम्। यस्यति इत्युपरिष्टादुक्तम्। प्रकृते सम्पूर्वात्तु 'संयसश्च' (पा.सू.३.१.७२) इति श्यन्विकल्पनात्पक्षे उत्सर्गे शपि संयसति। यसतीति यसु प्रयत्ने (दिवा.१२११)। इत्यस्य रूपम्। यस्यति। संयसति। इत्येतद्द्वयमितः पूर्वमुपपादितम्। प्रकृते तु 'यसोऽनुपसर्गात्' (पा.सू.३.१.७१) इति श्यन्विकल्पनात्पक्षे उत्सर्गे शपि यसति। अनुपसृष्टेऽयं नियमः। तेनोपसृष्टात् समुपसर्गवर्जं श्यन्नेव भवति। यथा प्रयस्यतीति। सम्पूर्वात्तु 'संयसश्च' (पा.सू.३.१.७२) इति श्यन्विकल्पनात् श्यन्पक्षे संयस्यति। उद्युङ्क्ते इत्येतत् उत्पूर्वस्य युजिर् योगे इत्यस्य रूपम्। उत्सहतीति उत्पूर्वस्य षह मर्षणे इत्यस्य आधृषीयस्य रूपम्। 'आधृषाद्वा' (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः, येष्वयं पठितः। तेन णिजभावे उत्सहति।

7. **उन्मादः** - उद् मद तृप्तियोगे। आधारे घञ्। उन्मादो रोगभेदः। मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः। मानसोऽयमदो व्याधिरुन्माद इति कीर्तितः।। इति सुश्रुते। उन्मादश्चित्तविभ्रम इत्यमरः।

म्लेटति मेडति लोडति उन्माद्यति लेट्यति लोट्यति इति षडुन्मादवाचकाः।

आद्यास्त्रयो यथाक्रमं म्लेटृ उन्मादे, मेडृ उन्मादे, लोडृ उन्मादे इत्येतेभ्यो भौव्वादिकेभ्यो निष्पन्नाः। उन्माद्यति इत्यत्र उत्पूर्वः मदी हर्षे इति दिवादिः। लेट्यति - लोट्यति इत्यनयोः लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने चेति कण्ड्वादिः। 'कण्ड्वादिभ्यो यक्' (पा.सू.३.१.२७) इति यक्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति यगन्तस्य धातुत्वाल्लडादयः।

8. **कृपा** - कृप कृपायां गतौ च। भिदादित्वादङ्। ततष्टाप्। 'कृपेः सम्प्रसारणञ्च' इति सम्प्रसारणम्। कारुण्यं करुणा घृणा। कृपा दयानुकम्पा स्यादनुक्रोशोऽपीत्यमरः। प्रत्युपकारानपेक्षया परदुःखप्रहरणेच्छायाम् अनुग्रहेच्छायाञ्च कृपाशब्दः प्रयुज्यते।

अनुकम्पते दयते क्रपते प्रसीदति अनुक्रोशति अभ्युपपद्यते अनुगृह्णाति अनुगृह्णीते करुणायते कृपायते ऋतीयते घृणायते इति द्वादश कृपावाचकास्तिङः।

तत्राद्याः पञ्च भौव्वादिकाः। अनुकम्पते इति अनुपूर्वः कपि चलने। अनुदात्तेदात्मनेभाषः। इदित्वात् 'इदितो नुम्धातोः' (पा.सू.७.१.५८) इति नुमागमः। दयते, क्रपते, प्रसीदतीत्येतेषु यथाक्रमं दय दानगतिरक्षणहिंसादानेषु, क्रप कृपायां गतौ च, प्रपूर्वः षद्लृ विशरणगत्यवसादनेषु इत्येते धातवः। षद्लृ धातोः 'पाघ्राध्मास्थाम्नादाण्' (पा.सू.७.३.७८) इत्यादिना सीदादेशः। अवन्ध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदतीति कालिदासः (रघु.३.२९)। अनुक्रोशति इति अनुपूर्वः क्रुश आह्वाने रोदने च। अभ्युपपद्यते इति अभि उप इत्युपसर्गद्वयपूर्वः पद गतौ इति दिवादिः। अनुगृह्णाति - अनुगृह्णीते इत्युभयत्र अनुपूर्वः ग्रह उपादाने। क्र्यादिः। 'ग्रहिज्यावयिव्यधि' (पा.सू.६.१.१६) इत्यादिना सम्प्रसारणम्। अद्य स्वं बहुमन्यते सहचरैरस्माभिराखण्डलो येनेतावदरुन्धतीपतिरपि स्वेनानुगृह्णाति न इति मुरारिः (अनर्घ.१.१८)। करुणायते इति करुणां वेदयते इत्यर्थे 'सुखादिभ्यः कर्तृवेदनायाम्' (पा.सू.३.१.१८) इति क्यङ्। अथवा पूर्वस्मादभूततद्भाव इत्यनुवर्त्तमाने 'लोहितादिडाज्भ्यः क्यष्' (पा.सू.३.१.१३) इति क्यष्। 'वा क्यषः' (पा.सू.१.३.९०) इति परस्मैपदं विकल्पितम्। अकरुणः करुणावान् भवति करुणायते। परस्मैपदपक्षे करुणायतीत्यपि भवति। कृपायते इति अकृपः कृपावान् भवति कृपायते। पक्षे कृपायति। ऋतीयते इति ऋतिः सौत्रो धातुः घृणार्थकः। अस्मात् 'ऋतेरीयङ्' (पा.सू.३.१.२९) इति ईयङ्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति यगन्तस्य धातुत्वाल्लडादयः। घृणायते इति घृणाशब्दं सुखादिषु पठित्वा घृणां वेदयते इत्यर्थे 'सुखादिभ्यः कर्तृवेदनायाम्' (पा.सू.३.१.१८) इति क्यङ्।

9. **क्रोधः** - क्रुध क्रोधे इत्यस्माद् भावे घञ्। प्रतिकूले सति तैक्ष्ण्यस्य प्रबोधः क्रोधः। कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियावित्यमरः।

चण्डते भामते संरभते क्रुध्यति रुष्यति कुप्यति गुध्नाति गृह्णाति - गृह्णीते रोषयति भामयति मन्तूयति इति द्वादश।

आद्यास्त्रयः यथाक्रमं चडि कोपे, भाम क्रोधे, सम्पूर्वाद् रभ राभस्ये इत्येतेभ्यो भ्वादिभ्यो निष्पन्नाः। ततस्त्रयः यथाक्रमं क्रुध क्रोधे, रुष हिंसायाम्, कुप क्रोधे इत्येतेभ्यो दिवादिभ्यो निष्पन्नाः। गुध्नाति इति गुध रोषे इत्यस्मान्निष्पद्यते। गृह्णाति - गृह्णीते इत्येतयोः ग्रह उपादाने (क्र्या.१५३४) इति धातुः। 'ग्रहिज्यावयिव्यधि' (पा.सू.६.१.१६) इत्यादिना सम्प्रसारणम्। ततो द्वौ रुष रोषे, भाम क्रोधे इत्येताभ्यां चुरादिभ्यां निष्पन्नौ। मन्तूयतीति मन्तु अपराधे इत्यस्मात्कण्ड्वादेः 'कण्ड्वादिभ्यो यक्' (पा.सू.३.१.२७) इति यकि 'अकृत्सार्व-धातुकयोर्दीर्घः' (पा.सू.७.४.२५) इत्यजन्ताङ्गस्य दीर्घे 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति यगन्तस्य धातुत्वाल्लडादिषु निष्पद्यते।

10. **क्षान्तिः** - क्षमूष् सहने इत्यस्माद् भावे क्तिन्। सामर्थ्ये सत्यप्यपकारिणोऽपकाराचिकीर्षायां क्षमायामयं शब्दः प्रयुज्यते। क्षान्तिस्तितिक्षेत्यमरः। क्षान्त्या शुद्ध्यन्ति विद्वांसः इति मनुः।

क्षमते सहते तितिक्षते सह्यति मृष्यति मृष्यते क्षाम्यति परिमृष्यति अधिकुरुते क्षम्पयति सहति साहयति मर्षति मर्षते मर्ष यति मर्षयते क्षामयति इत्येते सप्तदश क्षान्तिवाचकाः।

आद्यास्त्रयो भौव्वादिकाः। ततो दिवादयश्चत्वारः। ततस्तनादिरेकः। ततश्चुरादयोऽन्त्यवर्जम्। अन्त्यस्तु णिजन्तः।

क्षमते, सहते इत्यनयोः यथाक्रमं क्षमूष् सहने, षह मर्षणे इतीमौ धातू। प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं ययेति भारविः (किरा.२.२१)। तितिक्षते इत्यत्र तिज निशाने इति धातुः। 'गुप्तिज्किद्भ्यः सन्' (पा.सू.३.१.५) इति सन्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति सन्नन्तस्य धातुत्वाल्लडादयः। सह्यतीति षह चक्यर्थे इत्यस्माद्धातोः जायते। 'धात्वादेः षः सः' (पा.सू.६.१.६४) इति सत्वमुभयत्र। मृष्यति - मृष्यते इत्युभयोः मृष तितिक्षायाम्। स्वरितेत्वादुभयतोभाषः। क्षाम्यतीत्यत्र क्षमू सहने। 'शमामष्टानां दीर्घः श्यनि' (पा.सू.७.३.७४) इति दीर्घः। परिमृष्यतीति परि पूर्वः मृष तितिक्षायाम् इत्यस्मान्निष्पन्नः। स्वरितेत्वादुभयतोभाषः। तेन मृष्यति - मृष्यते इति रूपद्वयं स्वतसिद्धम्। प्रकृते तु 'परेर्मृषः' (पा.सू.१.३.८२) इति परस्मैपदम्। स्वरितेत्वादेव सिद्धे क्रियाफलस्य कर्तृ गामित्वेऽपि विधानार्थमिदम्। अधिकुरुत इत्यत्र अधिपूर्वः डुकृञ् करणे इत्ययं धातुः। क्षम्पयतीति क्षपि क्षान्त्याम् इत्यस्माज्जायते। सहति - साहयतीत्युभौ षह मर्षणे इत्यतो जायेते। 'आधृषाद्वा' (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः। तेष्वयमन्यतमः। अतो णिजभावपक्षे सहति। णिचि साहयति। गुर्वपि विरहदुःखमाशावन्धः साहयतीति कालिदासः (शाकु.४.१६)। मर्षतिप्रभृतयश्चत्वारः मृष तितिक्षायाम् इत्यतो जायन्ते। 'आधृषाद्वा' (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः। अयं तदन्तर्भूतः। तेन णिचि तदभावे चोभयपदयोः रूपचतुष्टयम्। क्षामयतीत्यत्र क्षामशब्दात् 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (गणसूत्रम्) इति णिच्।

11. **गर्वः** - गर्व दर्पे भावे घञ्। ऐश्वर्यरूपतारुण्यकुलविद्याबलैरपि। इष्टलाभादिनान्येषामवज्ञा गर्व ईरितः। गर्वो ऽभिमानोऽहङ्कार इत्यमरः।

कण्डते शौटति कडति क्षीवते कर्वति खर्वति गर्वति हर्षति उद्यति अभिमन्यते दृप्यति माद्यति हृष्यति अभिमनुते अहच्रोति - अहचुरुते गर्वयते इति सप्तदश गर्ववाचकास्तिङः।

एतेष्वाद्या अष्टौ यथाक्रमं कडि मदे, शौटृ गर्वे, कड मदे, क्षीबृ मदे, कर्व दर्पे, खर्व दर्पे, गर्व दर्पे, हृषु अलीके इत्येतेभ्यो भ्वादिगणधातुभ्यो निष्पन्नाः। कडतीत्यत्र कड मदे इत्यस्य तौदादिकस्यापि ग्रहणम्। ततश्चत्वारो दैवादिकाः यथाक्रमं उत्पूर्वः दो अवखण्डने, अभिपूर्वः मन ज्ञाने, दृप हर्षमोहनयोः, मदी हर्षे इत्येतेभ्यो निष्पन्नाः। कामः कौसुमचापदुर्ज यममुं जेतुं नृपं त्वां धनुर्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसाविति श्रीहर्षः (नैष.३.१२६)। हृष्यति इति हृष तुष्टौ इति दिवादिः। अभिमनुते इति अभिपूर्वः मनु अवबोधने इति तनादिः। अहच्रोति - अहचुरुते इत्येतौ अहं + डुकृञ् करणे। अहम्बुद्धिं करोतीत्यर्थः। अहमिति विभक्तिप्रतिरूपकं मान्तमव्ययम्। गर्वयते इत्यत्र गर्व माने इति चुरादिः।

12. **गार्ध्यम्** - गार्ध्यमाकाङ्क्षा। गृधु अभिकाङ्क्षायामित्यस्माद्धातोः भावे घञ्। ततः स्वार्थे ष्यञ्। लोभार्थे प्रयुक्तो दृश्यते। 'पीत्वा जलानां निधिनातिगार्ध्यात्' इति माघः।

ककते धनायति लुभ्यति गृध्यति भूणयते अर्थयति इति षट् तिङन्ताः गार्ध्यवाचकाः।

ककते इति कक लौल्ये इत्यस्माद्धातोः जायते। लौल्यं गर्वश्चापल्यञ्चेति धातुवृत्तौ। धनायतीति धन धान्ये इत्यतो निष्पद्यते। सत्यपि धनेऽधिकमिच्छतीत्यर्थे 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' (पा.सू.७.४.३४) इति क्यजन्तो निपातितः। धनशब्दस्यात्वं निपात्यते। धनीयतीति प्रत्युदाहरणे यथाप्राप्तं 'सुप आत्मनः क्यच्' (पा.सू.३.१.८) इति क्यच्। दरिद्रः सन् धनमिच्छतीत्यर्थः। लुभ्यतीत्यत्र लुभ गार्ध्ये इति धातुः। गृध्यतीति गृधु अभिकाङ्क्षायाम् इत्यतो निष्पन्नम्। भ्रूणयते इत्यत्र भ्रूण आशाविशङ्कयोः इति धातुः। अर्थयतीति अर्थ उपयाच्ञायाम् इत्यस्माज्जायते।

13. **ग्लानिः** - ग्लै हर्षक्षये। भावे नित्प्रत्ययः। दौर्बल्ये स्वकार्याक्षमतायाञ्च ग्लानिशब्दः प्रयुज्यते। देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति इति भागवते। स्वकर्मभ्यो निवर्तन्ते मनश्च ग्लानिमृच्छतीति मनुः। रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा। ग्लानिर्निष्प्राणता कम्पकार्श्यानुत्साहतादिकृत्।

ग्लेपते चोपति ग्लायति परिम्लायति खिद्यते निर्विद्यते ताम्यति श्राम्यति क्लाम्यति क्लामति खिन्दति खिन्ते इति द्वादश।

आद्याश्चत्वारो यथाक्रमं ग्लेपृ दैन्ये, चुप मन्दायां गतौ, ग्लै हर्षक्षये, परिपूर्वः म्लै हर्षक्षये इत्येतेभ्यो भौव्वादिकधातुभ्यो निष्पन्नाः। खिद्यते इत्यत्र खिद दैन्ये इति दिवादिः। श्रममलं तपसैव गता पुनः किमिति सम्भ्रमकारिणि खिद्यत इति हर्षदेवः (नागा.१.१७)। निर्विद्यते इति निरित्युपसर्गपूर्वः विद सत्तायाम् इति दिवादिः। ताम्यति इति तमु काङ्क्षायाम् इति दिवादिः। 'शमामष्टानां दीर्घः श्यनि' (पा.सू.७.३.७४) इति दीर्घः। प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं न्वितीति श्रीहर्षः (नैष.४.३०)। श्राम्यतीति श्रमु तपसि खेदे च इत्यस्मान्निष्पद्यते। क्लाम्यति इति क्लमु ग्लानौ इत्यस्मान्निष्पद्यते। 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (पा.सू.३.१.७०) इति शब्विषये श्यन्विकल्पः। यथाप्राप्ते शपि क्लामति। खिन्दति इति खिद परिघाते इत्यस्य तौदादिकस्य रूपम्। खिन्ते इति खिद दैन्ये इत्यस्य रुधादे रूपम्।

14. **जागरः** - जागृ निद्राक्षये इत्यस्माद् भावे घञ्। निद्राक्षये। जागर्या जागरा द्वयोरित्यमरः।

द्राहते जागर्ति प्रबुध्यते इति त्रयस्तद्वाचकाः। धातवो यथाक्रमं द्राहृ निद्राक्षये इति भौव्वादिकः, जागृ निद्राक्षये इत्यादादिकः, प्रपूर्वः बुध अवगमने इति दैवादिकश्च। प्रबुध्यतेः कर्मणि तङ्।

15. **जिघांसा** - हन हिंसागत्योः इत्यस्मात्सन्। तत अप्रत्ययः। हननेच्छायां प्रयुज्यते।

जिघांसति अपराध्यति अवराध्यति द्रुह्यति अपराध्नोति रिणोति क्षिणोति चिरिणोति जिरिणोति दाश्नोति दृणोति अपकरोति अपकुरुते इति त्रयोदश।

जिघांसति इति हन हिंसागत्योः (अदा.१०१३)। इत्यस्मात् 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (पा.सू.३.१.७) इति सन्। 'अज्झनगमां सनि' (पा.सू.६.४.१६) इति दीर्घः। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति सन्नन्तस्य धातुत्वाल्लडादयः। अपराध्यति अवराध्यति इत्येतौ अपपूर्वः तथा अवपूर्वश्च राधोऽकर्मकाद्वृद्धावेव इत्यस्मान्निष्पन्नौ। द्रुह्यतीत्यत्र द्रुह जिघांसायाम्। ततः अपराध्नोति इत्यारभ्य दाश्नोति पर्यन्तं स्वादयः। ते च यथाक्रमं अपपूर्वः राध संसिद्धौ, रि हिंसायाम्, क्षि हिंसायाम्। चिरि हिंसायाम्, जिरि हिंसायाम्, दाश हिंसायाम्, दृ हिंसायाम् इत्येतेभ्यो धातुभ्यो निष्पन्नाः। शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोतीति कालिदासः (रघु.२.४०)। अपकरोति - अपकुरुते इत्येतौ अपपूर्वस्य डुकृञ् करणे इत्यस्य रूपे।

16. **जृम्भे** - जृभि गात्रविनामे इत्यस्माद् भावे घञ्। गात्रशैथिल्यापादके मुखविकाशकारके च व्यापारभेदे। जृम्भात्यर्थं समीरणात्। पीत्वैकं श्वासमनिलः पुनस्त्यजति वेगवान्। आलस्यनिद्रायुक्तस्य स जृम्भ इति कथ्यते। जृम्भस्तु त्रिषु जृम्भणमित्यमरः।

जम्भते जञ्जभ्यते जृम्भते इति त्रयस्तद्वाचकाः। त्रयोऽपि भ्वादयः। जम्भते इति जभी गात्रविनामे इत्यस्मान्निष्पद्यते। जञ्जभ्यते इति जभी गात्रविनामे इत्यस्मात् 'लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्' (पा.सू.३.१.२४) इति यङ्। गर्हितं जम्भते जञ्जभ्यते। 'जपजभदहदशभञ्जपशाञ्च' (पा.सू.७.४.८६) इति नुगागमः। जृम्भते इति जृभि गात्रविनामे इत्यतो धातोः निष्पद्यते। आतन्वानमनन्यजन्मनयनश्लाघ्यामनर्घ्यां दशामानन्दं व्रजसुन्दरीस्तनतटीसाम्राज्यमुज्जृम्भत इति लीलाशुकः (कृष्ण.८७)।

17. **तन्द्री** - ततम् इन्द्रियाणां विस्तारं द्रातीति तन्द्री। औणादिकः। तन्द्री प्रमीलेत्यमरः। स्वापोन्मुखस्य सुप्तोत्थितस्य च निद्रोत्थम् आलस्यमर्थः।

घूर्णते प्रमीलति प्रचलायते इति त्रयस्तदर्थकास्तिङः।

त्रयोऽपि भ्वादयो यथाक्रमं घूर्ण भ्रमणे, प्रपूर्वः मील निमेषणे, प्रपूर्वः चल कम्पने इत्येतेभ्यो निष्पन्नाः। प्रचलायते इत्यत्र 'ज्वलितिकसन्तेभ्यो णः' (पा.सू.३.१.१४०) इति णः। कृदन्तत्वात् प्रातिपदिकविभक्तिकार्येषु प्रचलशब्दात् 'कर्तुः क्यङ् सलोपश्च' (पा.सू.३.१.११) इति क्यङ्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति क्यङन्तस्य धातुत्वाल्लडादयः।

18. **दुःखम्** - दुष्टानि खानि यस्मिन्निति दुःखाद् अच्। अथवा दुर् दुष्टं खनतीति। खनु विदारणे इत्यस्माद् डः। सॉख्यादिमतसिद्धे प्रतिकूलवेदनीये रजः कार्ये चित्तादिधर्मभेदे। न्यायमते अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम्। पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजं स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः।

व्यथते तपति दूयते क्लिश्यते कुट्टयति कूटयति तन्तस्यति - पम्पस्यति दुःखायते दुःख्यति कृच्छ्रायते इत्येकादश दुःखवाचकास्तिङः।

आद्यौ यथाक्रमं व्यथ भयसञ्चलनयोः, तप सन्तापे इत्येताभ्यां भौव्वादिकधातुभ्यां निष्पन्नौ। ततः द्वौ दूङ् परितापे, क्लिश उपतापे इत्येताभ्यां दैवादिकाभ्यां निष्पन्नौ। अपरौ कुट्ट प्रतापने, कूट परितापे इत्येताभ्यां निष्पन्नौ। तन्तस्यति - पम्पस्यति इत्येतौ तन्तस् पम्पस् दुःखे इत्यस्मात्कण्ड्वादेः 'कण्ड्वादिभ्यो यक्' (पा.सू.३.१.२७) इति यकि 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति यगन्तस्य धातुत्वाल्लडादिषु निष्पद्यते। दुःखायते इत्यत्र दुःखशब्दात् 'सुखादिभ्यः कर्तृवेदनायाम्' (पा.सू.३.१.१८) इति क्यङ्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति क्यङन्तस्य धातुत्वाल्लडादयः। दुःख्यति इति दुःख तत्क्रियायाम् (कण्ड्वादिः)। 'कण्ड्वादिभ्यो यक्' (पा.सू.३.१.२७) इति यकि शेषं प्राग्वत्। कृच्छ्रायते इति कृच्छ्रशब्दात् 'सुखादिभ्यः कर्तृवेदनायाम्' (पा.सू.३.१.१८) इति क्यङि शेषं प्राग्वत्।

19. **द्वेषः** - द्विष अप्रीतौ इत्यस्माद्धातोः भावे घञि द्वेषः। यज्जातीयस्यार्थस्य सन्निकर्षात् दुःखमात्मोपलब्धवान् तज्जातीयमेवार्थं पश्यन् हातुमिच्छति सेयं हातुमिच्छा द्वेषः। एकस्यानेकार्थदर्शिनो दर्शनप्रतिसन्धानात् दुःखहेतौ द्वेषः इति भाष्यसम्मतोऽर्थः। विक्रियासिद्धविषया तद्बुद्धावसुखावहा। तन्नाशे प्रीणती पुंसां मानसी द्वेष उच्यते।। इति भरतः।

अपरजति अपरजते द्वेष्टि द्विष्टे विप्रीयते अपरज्यति अपरज्यते विरुणद्धि विरुन्धे विगृह्णाति विगृह्णीते इत्येकादश द्वेषवाचिनस्तिङन्ताः।

अपरजति - अपरजते इत्यनयोः अपपूर्वः रञ्ज रागे इत्ययं धातुः। 'रञ्जेश्च' (पा.सू.६.४.२६) इति नलोपः। द्वेष्टि - द्विष्टे इत्यनयोः द्विष अप्रीतौ इति धातुः। रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यत इति कालिदासः (शाकु.६.५)। विप्रीयत इत्यत्र विपूर्वः प्रीङ् प्रीतौ इति धातुः। अपरज्यति - अपरज्यते इत्यनयोः अपपूर्वः रञ्ज रागे इति धातुः। 'अनिदितां हल उपधायाः क्ङिति' (पा.सू.६.४.२४) इति नलोपः। विरुणद्धि - विरुन्धे इत्येतयोः विपूर्वः

रुधिर् आवरणे इति धातुः। नेत्रे निमीलयति रोदिति याति शोकं घ्राणं करेण विरुणद्धि विरौति चोच्चैरिति कालिदासः (ऋतु.६.२६)। विगृह्णाति - विगृह्णीते इत्यनयोः विपूर्वः ग्रह उपादाने इति धातुः। 'ग्रहिज्यावयिव्यधि' (पा.सू.६.१.१६) इत्यादिना सम्प्रसारणम्।

20. **निद्रा** - निपूर्वः द्रा कुत्सायां गतौ। भावे अप्रत्ययः। अभावप्रत्ययालम्बनायां वृत्तौ निद्राशब्दः प्रयुज्यते। वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः प्रमाणविपर्ययविकल्पनिद्रास्मृतयः इति पातञ्जले। चतसृणां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालम्बनावृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रम्। स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपीत्यमरः।

मन्दते द्रायति शेते निद्राति स्वपिति संसस्ति संस्ति संविशति निद्रायते इति नव तद्वाचकाः।

आद्यौ भ्वादी यथाक्रमं मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु, द्रै स्वप्ने इत्येताभ्यां निष्पन्नौ। शेते इति शीङ् स्वप्ने इत्यादादिकः। परस्पराङ्गव्यतिरिक्तशायी शेते जनः कामरसानुविद्ध इति कालिदासः (ऋतु.४.११)। निद्राति स्वपिति संसस्ति इत्येतेऽपि आदादिकाः यथाक्रमं द्रा कुत्सायां गतौ, ञिष्वप् शये, सम्पूर्वः षस स्वप्ने इत्येताभ्यां निष्पन्नौ। संस्ति इति सस्ति स्वप्ने इत्यादादिकः। इदित्वात् 'इदितो नुम्धातोः' (पा.सू.७.१.५८) इति नुमि संस् त् ति इति स्थिते बहूनां समवाये द्वयोः संयोगसॅंज्ञा नेत्याश्रित्य 'स्कोः संयोगाद्योरन्ते च' (पा.सू.८.२.२९) इति सलोपाभावे 'झरो झरि सवर्णे' (पा.सू.८.४.६५) इत्याद्यतकारस्य लोपविकल्पपक्षे संस्ति इति रूपम्। संविशति इति सम्पूर्वः विश प्रवेशने इति तौदादिकः। निद्रायते इति निद्राशब्दात् 'लोहितादिडाज्भ्यः क्यष्' (पा.सू.३.१.१३) इति क्यष्। अन्तस्तोषतुषारसौरभमय-श्वासानिलापूरणप्राणोत्तुङ्गभुजङ्गतल्पमधुना भद्रेण निद्रायते इति मुरारिः (अनर्घ.१.२७)।

21. **परिवृत्तिः** - परिपूर्वः वृतु वर्तने। स्त्रियां भावे क्तिन्। परिवर्त्तनम्। यथा महाभारते, 'तस्य कालपरीमाणमकरोत्स पितामहः। भूतेषु परिवृत्तिञ्च पुनरावृत्तिमेव चेति।

वलते घोटते परिवर्तते इति त्रयः परिवृत्तिवाचकास्तिङः।

यथाक्रमं वल संवरणे सञ्चरणे च, घुट परिवर्तने, परिपूर्वः वृतु वर्तने इत्येतेभ्यो भौव्वादिकेभ्यो निष्पद्यन्ते। पूर्वा वधीरितं श्रेयो दुःखं हि परिवर्तत इति कालिदासः (शाकु.७.१३)।

22. **प्रीतिः** - प्रीञ् तर्पणे इत्यस्माद् भावे क्तिन्। तृप्तिरित्यर्थः। मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः। स्यादानन्दथुरानन्दः शर्मसातसुखानि चेत्यमरः। पुंसः पूर्वापरीभावः सुखित्वेन व्यवस्थितिः। बुद्धेरुन्मीलनी गाढं प्रीतित्वेन निगद्यते।। इति भरतः।

मोदते ह्लादते आनन्दति नन्दति तूषते रोचते निर्वाति प्रीयते तुष्यति स्निह्यति माद्यति हृष्यति निर्वृणोति - निर्वृणुते पृणोति सुख्यति सुमनायते सुखायते प्रचेतीभवति प्रमनीभवति सुमनीभवति इत्येकादश प्रीतिवाचकास्तिङन्ताः।

तत्राद्याः षट् भ्वादयः। तत एक अदादिः। ततः पञ्च दिवादयः। स्वादयस्त्रयः। तत एकः कण्ड्वादिः। अपरौ द्वौ क्यङन्तौ। ततस्त्रयः श्व्यन्ताः।

एतेषु मोदते इत्यारभ्य स्निह्यतीति पर्यन्तं यथाक्रमं मुद हर्षे, ह्लादी सुखे च, आङ्पूर्वः टुनदि समृद्धौ, टुनदि समृद्धौ, तूष तुष्टौ, रुच दीप्तावभिप्रीतौ च, निरित्युपसर्गपूर्वः वा गतिगन्धनयोः, प्रीङ् प्रीतौ, तुष प्रीतौ, ष्णिह प्रीतौ, इत्येतेभ्यो धातुभ्यो निष्पन्नाः। माद्यतीति मदी हर्षे (दिवा.१२०९) इत्यस्माज्जायते। 'शमामष्टानां दीर्घः श्यनि' (पा.सू.७.३.७४) इति दीर्घः। स च 'अचश्च' (पा.सू.१.२.२८) इत्यचो विधीयते। भ्राम्यामि भोः क्षाम्य ममापराधं क्लान्तं मनो माद्यति दर्शनात्त इति नारायणभट्टः (धातु.२.६५)। हृष्यतीति हृष तुष्टौ इत्यतो निष्पद्यते। निर्वृणोति - निर्वृणुते इत्यनयोः निरित्युपसर्गपूर्वः वृञ् वरणे इत्ययमुभयतोभाषः। पृणोतीति पृ प्रीतौ इत्यतो निष्पद्यते। सुख्यतीति सुख तत्क्रियायाम् इति कण्ड्वादिः। 'कण्ड्वादिभ्यो यक्' (पा.सू.३.१.२७) इति यक्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति

यगन्तस्य धातुत्वाल्लडादयः। सुमनायत इत्यत्र अभूततद्भावविषये सुमनस् शब्दात् 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' (पा.सू.३.१.१२) इति क्यङ्। ततः सनाद्यन्ताः धातवः इति धातुत्वाल्लडादयः। सुखायत इत्यत्र सुख तत्क्रियायाम्। 'सुखादिभ्यः कर्तृवेदनायाम्' (पा.सू.३.१.१८) इति क्यङ्। शेषं प्राग्वत्। प्रचेतीभवतीति प्रपूर्वाच्चेतस् शब्दाद् अभूततद्भावे इत्यनुवर्तमाने 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' (पा.सू.५.४.५०) इति च्विः। प्रमनीभवतीत्यत्र प्रपूर्वा न्मनस् शब्दात् प्राग्वत् च्विः। एवम् असुमनाः सुमना भवति सुमनायते। प्राग्वत् च्विः।

23. **बीभत्सः** - बध बन्धने इत्यस्माच्चित्तविकारेऽर्थे सन्। बीभत्सो नाम जुगुप्सास्थायिभावात्मकः। स चाहृद्याप्रशस्ताप्रियाचोक्ष्यानिष्टश्रवणदर्शनोद्वेजनपरिकीर्तनादिभिरुत्पद्यते इति भरतः। बीभत्सं विकृतं त्रिष्विदं द्वयमित्यमरः।

जुगुप्सते बीभत्सते इति द्वौ बीभत्सवाचकौ।

उभौ भ्वादी। गुप गोपने इत्यस्मात् 'गुप्तिज्किद्भ्यः सन्' (पा.सू.३.१.५) इति सूत्रेण निन्दायां सन्। जुगुप्सतेऽघाद्व्यसनं तितिक्षुर्मीमांसते ब्रह्म च यो दृढात्मा इति नारायणभट्टः (धातु.२.३८)। बीभत्सते इत्यत्र बध बन्धने इत्यस्मात् 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (पा.सू.३.१.६) इति सन्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति सन्नन्तस्य धातुत्वाल्लडादयः।

24. **भीतिः** - ञिभी भये। स्त्रियां क्तिन्। भयम्। कम्प इति विश्वः। दरस्त्रासो भीतिर्भीः साध्वसं भयमित्यमरः।

भ्यसते व्यथते दरति भेषते भेषति बिभेति त्रस्यति त्रसति उद्विजते विनक्ति भ्रिणोति दर्भयति दर्भति इति त्रयोदश।

तत्राद्याश्चत्वारो भ्वादयः। जुहोत्यादिरेकः। दिवादी द्वौ। तुदादिरेकः। रुधादिः। क्र्यादिः। चुरादी द्वौ।

भ्यसते इत्यत्र भ्यस भये इति धातुः। व्यथते इति व्यथ भयसञ्चलनयोः इत्यस्माद्धातोः जायते। तवाभिधानाद् व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरग इति भारविः (किरा.१.२४)। दरतीति दॄ भये (भ्वा.८०९) इत्यस्य रूपम्। भेषति - भेषते इत्येतद्द्वयं भेषृ भये (भ्वा.८८४) इत्यस्मान्निष्पद्यते। स्वरितेदयमुभयतोभाषः। बिभेतीति ञिभी भये (जुहो.१०८५) इत्यतो जायते। बिभेति रुष्टासि किलेत्यकस्मात्स त्वां किलापेति हसत्यकाण्डे इति श्रीहर्षः (नैष.३.११२)। त्रस्यति - त्रसति इत्येतौ त्रसी उद्वेगे (दिवा.१११८) इत्यस्माज्जायेते। 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (पा.सू.३.१.७०) इति श्यन्विकल्पनात्पक्षे शपि च रूपद्वयमवधेयम्। व्यधित वाससि कम्पमदःश्रिते त्रसति कः सति नाश्रयबाधन इति श्रीहर्षः (नैष.४.१६)। उद्विजते इति उत्पूर्वस्य ओविजी भयचलनयोः (तुदा.१२९०) इत्यस्य रूपम्। विनक्तीति ओविजी भयचलनयोः (रुधा.१४६१) इत्यस्माज्जायते। भ्रिणोतीति भ्री भये। भरणे इत्येके (क्र्या.१५०६) इत्यतो निष्पद्यते। दर्भयति - दर्भति इत्येतौ दृभी भये (चुरा.१८२२) इत्यस्य रूपे। 'आधृषाद्वा' इति गणसूत्रेण धृषधातुमभिव्याप्य विभाषितणिचो धातव उक्ताः येष्वयं पठितः। तेन णिचि तदभावे च दर्भयति - दर्भति।

25. **रोदनम्** - रुदिर् अश्रुविमोचने। करणे ल्युट्। क्रन्दने अश्रुणि मेदिनी। करणे ल्युट्। ङीप्। अस्रु नेत्राम्बु रोदनं चास्रमश्रु चेत्यमरः।

क्लिन्दते क्लिन्दति कन्दति क्रन्दति क्लन्दति विलपति तेवते परिदेवते क्रोशति रोदिति अस्रयति बाष्पायते एते द्वादश रोदनार्थकाः।

आद्या नव भौव्वादयः। यथाक्रमं क्लिदि परिदेवने, क्लिदि परिदेवने, कदि आह्वाने रोदने च, क्रदि आह्वाने रोदने च, क्लदि आह्वाने रोदने च, विपूर्वः लप व्यक्तायां वाचि, तेवृ देवने, परिपूर्वः देवृ देवने, क्रुश आह्वाने रोदने च इत्येतेभ्यो धातुभ्यो निष्पन्नाः। रोदिति इति रुदिर् अश्रुविमोचने इत्यादादिकः। अयोमयीं तस्य परैमि चेतनां महाभये

रज्यति यो न रोदितीत्यश्वघोषः (बुद्ध.४.९९)। अस्रयतीत्यत्र अस्र धातुरदन्तः। 'बहुलमेतन्निदर्शनम्' (गणसूत्रम्) इत्यत्र बहुलग्रहणस्य अदन्तधातुनिदर्शनमित्यर्थमाख्याय अस्रेति धातुराहरणीयः। अथवा दशगणीपाठो बहुलमित्यर्थान्तरमुपकल्प्यात्र समाधेयम्। बाष्पायते इत्यत्र बाष्पमुद्वमतीत्यर्थे 'बाष्पोष्मभ्यामुद्वमने' (पा.सू.३.१.१६) इति सूत्रेण बाष्पशब्दात्क्यङ्। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति क्यङन्तस्य धातुत्वाल्लडादयः।

26. **वञ्चना** - वञ्चु प्रलम्भने इत्यस्माण्ण्यन्ताद् युच् टाप्। अन्यथास्थितस्य वस्तुनोऽन्यथारूपेण कथनादिनाऽन्यमोहोत्पादनरूपे प्रतारणे वर्तते।

शठति प्रतारयति विप्रलभते उल्लापयते छलयति दभ्नोति प्रलोभयति वञ्चयते गर्धयति इति नव वञ्चनार्थकाः।

तत्राद्यास्त्रयो यथाक्रमं शठ कैतवे च, प्रपूर्वः तॄ प्लवनतरणयोः, वि प्र इत्युपसर्गद्वयपूर्वः डुलभष् प्राप्तौ इत्येतेभ्यो भौव्वादिकधातुभ्यो निष्पन्नाः। उल्लापयते इत्यत्र उत्पूर्वः लीङ् श्लेषणे इति दैवादिको धातुः। अस्माण्ण्यन्तात् 'प्रलम्भनाऽभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम्' (पा.सू.७.३.३९-वा.१) इत्यात्वम्। 'गृधिवञ्च्योः प्रलम्भने' (पा.सू.१.३.६९) इत्यतः प्रलम्भने इत्यनुवर्त्य 'लियः सम्माननशालीनीकरणयोश्च' (पा.सू.१.३.७०) इत्यकर्तृगेऽपि फले आत्मनेपदम्। छलयतीत्यस्मिन् छो छेदने इत्यस्माद्दैवादिकात् 'वृषादिभ्यश्चित्' (उणा.१.१०६) इति कलप्रत्ययः। 'आदेच उपदेशेऽशिति' (पा.सू.६.१.४५) इत्यात्वम्। 'आतो लोप इटि च' (पा.सू.६.४.६४) इत्यालोपः। ततो ण्यन्ताल्लडादयः। दभ्नोति इति दन्भु दम्भने इति स्वादिः। प्रलोभयति इति प्रपूर्वः लुभ विमोहने इति तुदादिः। ण्यन्तः। अन्त्यौ द्वौ यथाक्रमं वञ्चु प्रलम्भने, गर्ध अभिकाङ्क्षायाम् इति चुरादी।

27. **शोकः** - शुच शोके इत्यस्माद् भावे घञ्। शोकश्चित्तविकलता। इष्टवियोगानुचिन्तनम् इति नागोजीभट्टः। बन्धादिवियोगजनिता मनः पीडा इति भावप्रकाशः। मन्युः शोकः इत्यमरः।

शोचति मण्ठते कण्ठते विषीदति कण्ठयति इति पञ्च शोकवाचकास्तिङः।

तत्राद्यास्त्रयो यथाक्रमं शुच शोके, मठि शोके, कठि शोके इत्येतेभ्यो भ्वादिभ्यो जायन्ते। विषीदतीत्यत्र विपूर्वस्य षद्लृ विशरणगत्यवसादनेषु इति भौव्वादेः तथा षद्लृ विशरणगत्यवसादनेषु इति तौदादिकस्य चाविशेषेण ग्रहणम्। 'पाघ्राध्मास्थाम्नादाण्' (पा.सू.७.३.७८) इत्यादिना सीदादेशः। 'सदिरप्रतेः' (पा.सू.८.३.६६) इति षत्वम्। कण्ठयतीत्यत्र कठि शोके इति चौरादिकः।

28. **स्नेहः** - ष्णिह स्नेहने। भावे घञ्। दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा। यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते।। इति गारुडे।

वर्षते मेदते स्वेदते अनुरजति - अनुरजते अनुरज्यति - अनुरज्यते प्रीयते स्निह्यति मेद्यति क्ष्विद्यति तिलति पुष्णाति प्लुष्णाति मिन्दयति स्नेहयति तेलयति इति सप्तदश स्नेहवाचिनस्तिङः।

आद्याः पञ्च भौव्वादिकाः यथाक्रमं वर्ष स्नेहने, ञिमिदा स्नेहने, ञिष्विदा स्नेहनमोचनयोः, अनुपूर्वः रञ्ज रागे इत्येतेभ्यो निष्पन्नाः। रञ्जेः 'रञ्जेश्च' (पा.सू.६.४.२६) इति नलोपः। अनुरज्यति - अनुरज्यते इत्येतौ अनुपूर्वः रञ्ज रागे इत्यस्माद्दैवादिकान्निष्पन्नौ। अत्र च रञ्जेः 'अनिदितां हल उपधायाः क्ङिति' (पा.सू.६.४.२४) इति नलोपः। ततश्चत्वारो दैवादिकाः यथाक्रमं प्रीङ् प्रीतौ, ष्णिह प्रीतौ, ञिमिदा स्नेहने, ञिक्ष्विदा स्नेहनमोचनयोः इत्येतेभ्यो धातुभ्यो निष्पन्नाः।

तिलतीति तिल स्नेहे इत्यस्मात्तौदादिकान्निष्पद्यते। पुष्णाति प्लुष्णातीत्येतौ यथाक्रमं पुष स्नेहनसेवनपूरणेषु प्लुष स्नेहनसेवनपूरणेषु इत्येताभ्यां क्र्यादिकाभ्यां निष्पद्येते। ततश्चौरादिकास्त्रयः यथाक्रमं मिदि स्नेहने, ष्णिह स्नेहने, तिल स्नेहने इत्येतेभ्यो निष्पद्यन्ते।

29. ह्रीः - ह्री लज्जायाम्। भावे क्विप्। सम्पदादित्वात्क्विप्। मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जेत्यमरः।

ह्रीच्छति त्रपते जिह्रेति व्रीड्यति लजते लज्जते हृणीयते मन्दाक्षयति इत्यष्टौ लज्जावाचकास्तिङः।

ह्रीच्छतीति त्रपते इत्यनयोः यथाक्रमं ह्रीछ लज्जायाम्, त्रपूष् लज्जायाम् इतीमौ भौव्वादिकौ धातू। जिह्रेतीति ह्री लज्जायाम् इत्यस्माज्जायते। जिह्रेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेनेति श्रीहर्षः (नैष.३.४३)। व्रीड्यतीति व्रीड चोदने लज्जायाञ्च इत्यस्य रूपम्। लजते इति ओ लजी व्रीडने इत्यस्माज्जायते। लज्जते इति ओ लस्जी व्रीडने इत्यस्य रूपम्। जश्त्वश्चुत्वे। त्वत्प्रापकान्त्रस्यति नैनसोऽपि त्वय्येष दास्येऽपि न लज्जते यदिति श्रीहर्षः (नैष.३.११०)। हृणीयते इति हृणीङ् रोषे लज्जायाञ्च इत्यस्मात्कण्ड्वादेः 'कण्ड्वादिभ्यो यक्' (पा.सू.३.१.२७) इति यक्। 'अकृत्सार्वधातुकयोर्दीर्घः' (पा.सू.७.४.२५) इत्यजन्ताङ्गस्य दीर्घः। 'सनाद्यन्ता धातवः' (पा.सू.३.१.३२) इति यगन्तस्य धातुत्वाल्लडादयः। दिवोऽपि वज्रायुधभूषणाया ह्रिणीयते वीरवती न भूमिरिति भट्टिः (भट्टि.२.३८)। मन्दाक्षयति इत्यत्राक्षशब्द इन्द्रियवाची। मन्दमक्षं वागाद्यस्मिन्नित्यर्थः। अक्षमिन्द्रिये इत्यमरः। मन्दाक्षशब्दात् 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (गणसूत्रम्) इति णिच्।

मनोवृत्तिवाचकानां शब्दानामयमेकदेशः सङ्ग्रहः। यदितोऽधिकमत्र योजयितुमुचितं मन्वते सुधियस्तानप्याकलय्याध्येष्यन्ताम्।